# आदर्श-प्रश्नपत्रम्

**संस्कृतम् ( केन्द्रिकम् )**

**कक्षा - द्वादश ( XII )**

**समय- होरात्रयम्** **पूर्णाङ्काः-100**

## खण्डः - क ( 45 )

1. **( क ) अधोलिखितस्य गद्यांशस्य सरलार्थं हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** **5**

वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह-त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुनः वत्सराजः राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराजः भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोजः किमपि वत्सराजं कथितवान्। तद्वचनैः वैराग्यमापन्नो वत्सराजः तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष। पुनः कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह-श्रीमता यदादिष्टं तत्साधितमिति।

**( ख ) अधोलिखितस्य श्लोकस्य सरलार्थं हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** **5**

गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः।।

2. **( क ) अधोलिखितेषु गद्यखण्डेषु कस्यचित् एकस्य सप्रसङ्गव्याख्यां हिन्दी/आङ्ग्ल/संस्कृतभाषायां कुरुत।** **5**

(*i*) मातृदेवो भव। पितृदेवो भव। अतिथिदेवो भव।

(*ii*) ते केचनान्ये भवन्ति नीचा ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसि पातयन्ति।

(*iii*) परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः।

**( ख ) अधोलिखितेषु पद्यखण्डयोः कस्यचित् एकस्य सप्रसङ्गव्याख्यां हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** **5**

(*i*) त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।

(*ii*) नैर्गुण्यात्त्यज्यते स्नेहः स्नेहत्यागान्न शोच्यते।

3. **( क ) अधोलिखितयोः कस्यचित् एकस्य भावार्थं हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** **5**

(*i*) एकशरीर-संक्षिप्ता पृथिवी रक्षितव्येति।

(*ii*) आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्

**( ख ) अधोलिखितयोः पद्ययोः कस्यचित् एकस्य भावार्थं हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** **5**

(*i*) आरभेत हि कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।।

(*ii*) अद्यापि यत्र सरल-प्रकृति-प्रणीतं
पञ्चोपचारमिव पूजनमिव मातुः।

4. **( क ) अधोलिखितं गद्यांशं पठित्वा यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत।** **10**

संवृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत-प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यापि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत्-''कः कोऽत्र भोः? कः कोऽत्र भोः? इति। अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्-क एष मामनुत्तरयन् मुमूर्षः समायाति बधिरः?

ततो ''दौवारिक! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि? इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ 'तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः इति'' इत्येवं भाषमाणेन द्वाःस्थेन क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि'' इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः।

**( I ) एकपेदन उत्तरत-** **4 × ½ = 2**

(*i*) कः कस्यापि पादक्षेपध्वनिमिव अश्रौषीत्?

(*ii*) 'क एष मामनुत्तरयन् मुमूर्षः समायाति बधिरः' इति कः साक्षेपमवोचत्?

(*iii*) केषां आदेशः यत् दौवारिकेण प्रहरिणा वा त्रिपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः?

(*iv*) दौवारिक! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति वदसि। इति वाक्यं कः कथयति?

**( II ) पूर्णवाक्येन उत्तरत-** **1 × 3 = 3**

(*i*) प्रतापदुर्गदौवारिकः कमप्यनवलोकयन् गम्भीरस्वरेण कथमवादीत्?

(*ii*) क्षणानन्तरं पादध्वनिं श्रुत्वा भूपः साक्षेपम् किम् अवोचत्?

(*iii*) दौवारिकेण कीदृशः सन्यासी दृष्टः?

**( ख ) अधोलिखितं पद्यद्वयमधीत्य यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत- 5**

कर्णामृतं सूक्तिरसं विमुच्य
दोषेषु यत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य
क्रमेलकः कण्टकजालमेव।।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।

**( I ) एकपेदन उत्तरत-** **½ × 4 = 2**

(*i*) केलिवनं प्रविश्य कः कण्टकजालम् निरीक्षते?

(*ii*) खलानां सुमहान् यत्नः केषु भवति?

(*iii*) शास्त्रं कस्य लोचनं भवति?

(*iv*) शास्त्रं कस्य दर्शकम् भवति?

**( II ) पूर्णवाक्येन उत्तरत्-** **1 × 3 = 3**

(*i*) किं विमुच्य दोषेषु खलानां यत्न कः भवति?

(*ii*) कीदृशं शास्त्रं सर्वस्य लोचनम्?

(*iii*) कः नरः अन्ध एव?

**5. "नैकेनापिसमं गता वसुमती" अथवा "प्रतीक्षा" पाठस्य सारं हिन्दीभाषया लिखत। 5**

## खण्डः - ख ( 15 )

**6. अधोलिखितानां प्रश्नानाम् उत्तराणि हिन्दी/आङ्गल/संस्कृतभाषया लिखत- 5 × 3 = 15**

**( अ )** (*i*) वेदाः कति? कानि च तेषां नामानि? **2**

(*ii*) यम-नचिकेता सम्वादः कस्याम् उपनिषदि वर्तते? **1**

(*iii*) रामायणस्य रचयिता कः? 1

(*iv*) महाभारते कति पर्वाणि? 1

**(आ)** (*i*) लौकिकसंस्कृते काव्यरचनायाः प्रारम्भः
महर्षेः ........................... अभवत्। 1

(*ii*) महाकवि-कालिदासस्य काव्यानां नामानि लिखत? 2

(*iii*) 'किरातार्जुनीयम्' कस्य रचना वर्तते? 1

(*iv*) सौन्दरनन्दस्य रचयिता कः? 1

**(इ)** (*i*) नाट्यशास्त्रस्य लेखकः कः? 1

(*ii*) 'स्वप्नवासवदत्तम्' कस्य नाटकम्? 1

(*iii*) महाकविशूद्रकस्य नाटकस्य अभिधानम् किम्? 1

(*iv*) महाकवि-भासस्य नाटकानां संख्या कति? 1

(*v*) महाकवि-भवभूतेः एकस्याः रचनायाः नाम लिखत। 1

## खण्डः - ग (30)

**7. अधोलिखितेषु रेखाङ्कितपदेषु सन्धिविच्छेदं सन्धिं वा कुरुत-** **6**

(*i*) आकाशे चन्द्रोदयः भवति।

(*ii*) चन्द्रः रजनीशः अपि कथ्यते।

(*iii*) चन्द्रः प्रकाशं शीतलताञ्च प्रयच्छति।

(*iv*) यदि + अपि शुद्धम्, लोकविरुद्धं नाचरणीयम्।

(*v*) हरे + ए सततं नमः।

(*vi*) इमं अनु + छेदं ध्यानेन पठ।

**8. अधोलिखितेषु रेखाङ्कितपदेषु समस्तपदानां विग्रहः विग्रहीतपदानां समासश्च लिखत।** **8**

(*i*) बालकः प्रतिदिनं उद्यानं गच्छति।

(*ii*) उद्यानस्य मध्ये एकं चतुष्पथम् अस्ति।

(*iii*) तत्र एकं प्रभूतसलिलं सरः अस्ति।

(*iv*) सरोवरस्य निर्मलजलम् दृष्ट्वा जनाः प्रसीदन्ति।

(*v*) सरोवरस्य जले <u>हंसः च बकः</u> च तरतः।

(*vi*) जलस्य मध्ये <u>नीलम् कमलम्</u> विकसति।

(*vii*) अस्य <u>सरोवरस्य सौन्दर्यम्</u> अवर्णनीयेम् अस्ति।

(*viii*) सरोवरस्य सौन्दर्यं दृष्ट्वा जनाः इतः गन्तुम् <u>न उत्सुकाः</u> सन्ति।

**9. अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां प्रकृति-प्रत्ययं योजयत संयुक्तानां च विभागं कुरुत।** **1 × 8 = 8**

(*i*) समाजे <u>गुणिनः</u> जनाः एव पूजनीयाः भवन्ति।

(*ii*) ते एव नम्राः भवन्ति यतः ते <u>कटुतां</u> न आचरन्ति।

(*iii*) कटुतायाः स्थाने तु ते सर्वदा <u>मृदुत्वम्</u> एव जीवने धारयति।

(*iv*) मृदुतायाः पालनार्थं तैः किं किं न <u>कृ + क्त</u>।

(*v*) अस्माभिः अपि गुणिन इव <u>आ + चर् + तव्यत्</u>।

(*vi*) जीवने तथाविधं कार्यं <u>कृ + क्त्वा</u> एव जनाः सुखिनः भवन्ति।

(*vii*) <u>बुद्धि + मतुप्</u> तु एवमेव करोति।

(*viii*) <u>अज् + टाप्</u> तृणानि चरति।

**10. कोष्ठकेषु प्रदत्तपदेषु उचितविभक्तिं प्रयुज्य वाक्यपूर्तिं कुरुत।** **1 × 8 = 8**

(*i*) __________विना मोक्षो न भवति। (ज्ञान)

(*ii*) एषः मयूरः __________ रोचते। (अस्मद्)

(*iii*) बालकः __________ स्निह्यति। (मातृ)

(*iv*) सः __________ न बिभेति। (सिंह)

(*v*) __________ परितः पुष्पाणि सन्ति। (विद्यालय)

(*vi*) दिनेशः __________ सह आपणं गच्छति। (पितृ)

(*vii*) __________ कृते विद्यायाः अभ्यासः आवश्यकः। (छात्रः)

(*viii*) __________ कालिदासः श्रेष्ठः। (कवि)

## खण्डः - घ ( 10 )

**11. अधोलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य शत-शब्द-परिमितं निबन्धं लिखत।** **10**

(*i*) परोपकारः

(*ii*) अस्माकं देशः

(*iii*) भारतीया संस्कृतिः

(*iv*) संस्कृतस्य महत्त्वम्

# संस्कृत (केन्द्रिक) कक्षा - द्वादश XII

## अङ्कयोजना

### खण्डः (क) 45

| प्र.सं. | सम्भावित उत्तर | | अङ्क विभाजन |
|---|---|---|---|
| 1. (क) | गद्यांशस्य सरलार्थः (अत्र लेखनम् अनपेक्षितम्) | | 5 |
| (ख) | श्लोकस्य सरलार्थः | | 5 |
| 2. (क) | गद्यांशस्य सप्रसङ्गं व्याख्या | प्रसङ्ग-1, केन्द्रीय भाव-1, व्याख्या-3 | 5 |
| (ख) | श्लोकस्य सप्रसङ्गं व्याख्या | प्रसङ्ग-1, केन्द्रीय भाव-1, व्याख्या-3 | 5 |
| 3. (क) | नाट्यांशस्य (एकस्य) भावार्थः | | 5 |
| (ख) | एकस्य श्लोकस्य भावार्थः | | 5 |
| 4. (क) (I) | 1. प्रतापदुर्गदौवारिकः 2. प्रतापदुर्गदौवारिकः 3. प्रभुवर्याणाम् 4. संन्यासी | ½ × 4 | 2 |
| (II) | 1. कः कोऽत्र भोः? कः कोऽत्र भोः? इति। | 1 | 3 |
| | 2. क एष मामनुत्तरयन् मुमूर्षुः समायाति वधिरः। | 1 | |
| | 3. भिक्षवटुनानुगम्यमानः काषायवासः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी। | 1 | |
| (ख) (I) | 1. क्रमेलकः 2. दोषेषु 3. सर्वस्य 4. परोक्षार्थस्य | ½ × 4 | 2 |
| (II) | 1. सूक्तिरसं ..................... सुमहान भवति। | 1 | 3 |
| | 2. अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्। | 1 | |
| | 3. यस्य सर्वस्य लोचनं शास्त्रं नास्ति। | 1 | |
| 5. | पाठसारः 50-60 शब्दपरिमितः | | 5 |

### खण्डः (ख) 15

| प्र.सं. | सम्भावित उत्तर | | अङ्क विभाजन |
|---|---|---|---|
| 6. (अ) | 1. चत्वारः, ऋग्वेदः यजुर्वेदः सामवेदः अर्थवेदः | 1+ 1 | 5 |
| | 2. कठोपनिषदि | 1 | |
| | 3. वाल्मीकिः | 1 | |
| | 4. अष्टादश | 1 | |
| (आ) | 1. वाल्मीके: | 1 | 5 |
| | 2. रघुवंशम्, कुमारसम्भवम् | 1+ 1 | |
| | 3. महाकवि-भारवेः | 1 | |
| | 4. महाकवि अश्वघोषः | 1 | |

| | | | |
|---|---|---|---|
| (इ) 1. आचार्यभरतः | 1 | | 5 |
| 2. महाकवि–भासस्य | 1 | | |
| 3. मृच्छकटिकम् | 1 | | |
| 4. त्रयोदश | 1 | | |
| 5. उत्तररामचरितम्/महावीरचरितम्/मालतीमाधवम् | 1 | | |

## खण्डः (ग) 30

| | | | | |
|---|---|---|---|---|
| 7. (*i*) चन्द्र + उदयः | (*ii*) रजनी + ईशः | (*iii*) शीतलताम् + च | 1 × 6 | 6 |
| (*iv*) यद्यपि | (*v*) हरये | (*vi*) अनुच्छेदम् | | |

| | | | |
|---|---|---|---|
| 8. (*i*) दिनम् दिनम् इति | (*ii*) चतुर्णां पथानां समाहारः | 1 × 8 | 8 |
| (*iii*) प्रभूतं सलिलं यस्मिन् तत् | (*iv*) निर्मलं तत् जलम्। | | |
| (*v*) हंसवकौ | (*vi*) नीलकमलम् | | |
| (*vii*) सरोवरसौन्दर्यम् | (*viii*) अनुत्सुकाः | | |

| | | | | |
|---|---|---|---|---|
| 9 (*i*) गुण + इन् | (*ii*) कटु + तल् | (*iii*) मृदु + त्व | 1 × 8 | 8 |
| (*iv*) कृ + क्त | (*v*) आचरितव्यम् | (*vi*) कृत्वा | | |
| (*vii*) बुद्धिमान् | (*viii*) अजा | | | |

| | | | | |
|---|---|---|---|---|
| 10 (*i*) ज्ञानम् | (*ii*) मह्यम् | (*iii*) मातरि | 1 × 8 | 8 |
| (*iv*) सिंहात् | (*v*) विद्यालयम् | (*vi*) पित्रा | | |
| (*vii*) छात्राणाम् | (*viii*) कविषु/कवीनाम् | | | |

## खण्डः (घ) 10

11. अधोलिखितविभाजनं दृष्ट्वा अङ्काः देयाः।

| | | |
|---|---|---|
| (*i*) विषयवस्तु | 4 | 10 |
| (*ii*) भाषाशुद्धता | 3 | |
| (*iii*) भाषाशैली | 3 | |

# संस्कृत कक्षा-12 (केन्द्रिक)

## <u>अंक विभाजन</u>

1. **पाठ्यपुस्तक** 45 अंक

(क) i गद्यांश का सरलार्थ 5
(हिन्दी/अंग्रेजी/संस्कृत भाषा में)
ii पद्यांश का सरलार्थ 5
(हिन्दी/अंग्रेजी/संस्कृत भाषा में)

(ख) i पद्यांश की सप्रसंग व्याख्या 5
(हिन्दी/अंग्रेजी/संस्कृत भाषा में)
ii गद्यांश की पंक्तियों की सप्रसंग व्याख्या 5
(हिन्दी/अंग्रेजी/संस्कृत भाषा में)

(ग) i पद्यांश की पंक्ति का भावार्थ 5
(हिन्दी/अंग्रेजी/संस्कृत भाषा में)
ii गद्यांश/नाट्यांश की पंक्ति का भावार्थ 5
(हिन्दी/अंग्रेजी/संस्कृत भाषा में)

(घ) संस्कृत में प्रश्नोत्तर 10
i लघु-उत्तरीय (3 x 2) = 6
ii अति लघु-उत्तरीय (1 x 4) = 4

(ङ) पाठ-सार (कथा सार) हिन्दी भाषा में 5

2. **संस्कृत साहित्य का इतिहास** 15 अंक
(परिचयात्मक ज्ञान के प्रश्न)
i वेद, उपनिषद्, रामायण, महाभारत 5
ii काव्य (गद्य-पद्य) 5
iii नाटक 5

3. (क) **व्याकरण** 30 अंक

i सन्धिविच्छेद (1 x 3) = 3

ii सन्धि (1 x 3) = 3

(ख) **समास**

i समस्तपदों का विग्रह एवं नाम (1 x 4) = 4

ii विग्रहित पदों का समस्तपद एवं नाम (1 x 4) = 4

(ग) **प्रत्यय**

निर्धारित प्रत्ययों का वाक्यप्रयोग के माध्यम से परिचयात्मक प्रश्न

i प्रकृति-प्रत्यय विभाजन (1 x 4) = 4

ii प्रकृति-मेलन (1 x 4) = 4

(घ) **कारक प्रयोग**

i कारक-विभक्ति का संस्कृत वाक्य में प्रयोग (1 x 4) = 4

ii उपपद-विभक्ति का संस्कृत वाक्य में प्रयोग (1 x 4) = 4

6. **लघु निबन्ध** 10 अंक

(लगभग 100 शब्दों में)

छात्रों के परिचित विषय पर

**कुल अंक - <u>100 अंक</u>**